Date
Page

विषय - संस्कृत, बी॰ए॰ स्नातक (प्रतिष्ठा)
प्रथम वर्ष, प्रथम पत्र
कुमारसम्भवम् - पञ्चमसर्ग
पद्यांश व्याख्या

डॉ॰ ओम प्रकाश आर्य
महाराजा कॉलेज, आरा
दिनांक - 30।09।2020

इयेष सा कर्तुमवन्ध्यरूपताम्
समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः ॥2॥

अन्वयः-
सा समाधिम् आस्थाय तपोभिः आत्मनः अवन्ध्यरूपतां कर्तुम् इयेष, अन्यथा तथाविधं प्रेम वा तादृशः पतिश्च तद् द्वयं कथं वा अवाप्यते।

पदार्थः-
सा = वह पार्वती, समाधिम् = एकाग्रता को, आस्थाय = धारणकर, तपोभिः = तपस्या के द्वारा, आत्मनः = अपनी, अवन्ध्यरूपताम् = सौन्दर्य को सफल, कर्तुम् = करने की इच्छा की, अन्यथा = दूसरे प्रकार से, तथाविधम् = जिस भी प्रकार से, प्रेम = स्नेह, तादृशः = उस प्रकार से, पतिश्च = और पति का, तद् द्वयम् = ये दोनों, कथम् = किस प्रकार, अवाप्यते = प्राप्त होंगे।

संस्कृत व्याख्या (मल्लिनाथ)
सा पार्वती समाधि-

मेकाग्रतामास्थायावलम्ब्य तपोभिर्वक्ष्यमाणनियमैः आत्मनः स्वस्यावन्ध्यरूपतां सफलसौन्दर्यं कर्तुमियेषेच्छति स्मा तपसा शिवं वशीकर्तुमुद्युक्तेत्यर्थः। अन्यथा ततोऽन्यप्रकारेण कथं वा तद् द्वयमवाप्यते। किं तद् द्वयम्? तथाभूता विधा प्रकारो यस्य तत्तथाविधं प्रेम स्नेहः येनार्धाङ्हरा हरस्य भवेदिति भावः। तादृशः पतिश्च यो मृत्युञ्जयः- इति भावः। द्वयमेव खलु स्त्रीणामपेक्षितं यद् भर्तृवात्सल्यं जीवद्भर्तृकर्तृत्वं चेति। तच्च तपश्चर्यैकसाध्यमिति निश्चिकायेत्यर्थः। अत्र मनुः-
'यद् दुष्करं यद् दुरापं यद् दुर्गं यच्च दुस्तरम्। तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्॥ २॥

अर्थः-

इसके पश्चात् पार्वती अपने मन को एकाग्रचित्त करके अपनी तपस्या के बल पर अपने सौन्दर्य को सफल बनाने का विचार किया। क्योंकि अन्य किसी उपाय के द्वारा पति का उस प्रकार का उत्कट प्रेम तथा शिव जैसा पति- ये दोनों किस प्रकार से प्राप्त हो सकते हैं।

व्याकरणम् - अवन्ध्यरूपताम् - अवन्ध्यं रूपं यस्याः सा अवन्ध्यरूपा, तस्याः भावः अवन्ध्यरूपता, ताम्। तथाविधम् = तथाविधा यस्य तत् तथाविधम्। द्वयम्=द्वौ अवयवौ यस्य तद् द्वयम्॥ इति॥

Scanned with CamScanner